Reg. No. : ..................................

Name : ..................................

**ME 610**

# FIRST YEAR HIGHER SECONDARY MODEL EXAMINATION, JUNE 2022

## PART – II

## SANSKRIT

**Maximum : 80 Scores**

Time : 2½ Hours

Cool-off Time : 15 Minutes

---

***General Instructions to Candidates :***

- *There is a 'Cool off time' of 15 minutes in addition to the writing time.*
- *Use the 'Cool off time' to get familiar with questions and to plan your answers.*
- *Read questions carefully before answering.*
- *Read the instructions carefully.*

**Score**

**1-9 प्रश्नेषु षण्णां प्रश्नानाम् उत्तराणि कोष्ठकात् चित्वा लिखत। प्रत्येकम् एकः अङ्कः।** **(6×1=6)**

**1 മുതൽ 9 വരെയുള്ള ചോദ്യങ്ങളിൽ നിന്ന് ആറ് ചോദ്യങ്ങൾക്ക് ശരിയുത്തരം ബ്രാക്കറ്റിൽ നിന്നും എടുത്തെഴുതുക. ഓരോ സ്കോർ വീതം.**

1. फलागमैः नम्राः भवन्ति - के ?

   (तरवः, सत्पुरुषाः, दुर्जनाः)

2. आदिकाव्यं किम् ?

(महाभारतम्, रामायणम्, भागवतम्)

3. चिन्ताविष्टयाय सीता - अस्य कर्ता कः ?

(उळ्ळूर्, वल्लत्तोल्, कुमारनाशान्)

4. शरीरायासजननं कर्म ________ ।

(स्नानं, निद्रा, व्यायामः)

5. पुरातन सर्वकलाशाला का ?

(तक्षशिला, कालिघट्ट्, उज्जयिनी)

6. श्रोत्र- त्वक् - चक्षु - रसना - नासिका इत्येतानि केन नाम्ना व्यवह्रियते ?

(पञ्चेन्द्रियाणि, पञ्चतन्त्राणि, पञ्चसन्धयः)

7. अङ्गराजः कः ?

(शल्यः, शक्रः, कर्णः)

Score

8. ब्रह्मचारिरूपेण आगतः कः ?

(शिवः, विष्णुः, ब्रह्मा)

9. कस्य जन्मदिनं युवजनदिनत्वेन लोके सर्वत्र आघुष्यते ?

(स्वामि विवेकानन्दस्य, शङ्कराचार्यस्य, भासस्य)

**10-15 प्रश्नेषु चतुर्णां प्रश्नानाम् उत्तराणि लिखत। प्रत्येकं द्वौ अङ्कौ।** (4×2=8)

**10 മുതൽ 15 വരെയുള്ള ചോദ്യങ്ങളിൽ നാല് എണ്ണത്തിന് ഉത്തരമെഴുതുക. രണ്ട് സ്കോർ വീതം.**

10. प्रदत्तश्लोकांशात् संबोधनप्रथमारूपाणि चित्वा लिखत।

इयमस्तु नतिर्ममान्तिमा

दिनसाम्राज्यपते! दिवस्पते!।

11. पेटिकातः अक्षराण्युपयुज्य अर्थपूर्णं पदं पूरयत।

| | | |
|---|---|---|
| न | र | यु |

1) आ ________ र्वेदः।

2) दि ________ चर्या।

12. उदाहरणानुसारं सन्धत्त।

उदा - वृक्षात् + नो = वृक्षान्नो।

1) शब्दात् + नो = ________।

उदा - इति + अवदत् = इत्यवदत्।

2) अपि + अयम् = ________।

13. उदाहरणानुसारं पदच्छेदं लिखत।

उदा - बालाश्च = बाला: + च।

1) मन्दाश्चरितम् = ___ + ___।

उदा - अत्युन्नतम् = अति + उन्नतम्।

2) इत्युदीर्यते = ___ + ___।

14. पेटिकात: पदान्युपयुज्य अलङ्कारलक्षणानि पूर्णतया लिखत।

1) ________ यत्र सादृश्य लक्ष्मीरुल्लसति द्वयो:।

2) संभावना स्यात् ________ वस्तु हेतुफलात्मना।

| | | |
|---|---|---|
| उत्प्रेक्षा | रूपकम् | उपमा |

15. वृत्तलक्षणं योजयित्वा लिखत।

| | |
|---|---|
| स्यादिन्द्रवज्रा | जतजास्ततो गौ। |
| उपेन्द्रवज्रा | यदितौ जगौ ग:। |
| | उदीरितं जरौ। |

**16-18 प्रश्नानां प्रत्येकं त्रयो अङ्काः।**

**16 മുതൽ 18 വരെയുള്ള ചോദ്യങ്ങൾക്ക് ഓരോന്നിനും മൂന്ന് സ്കോർ വീതം.**

16. उदाहरणानुसारं वाक्यानि परिवर्तयत।

उदा - छात्रा: पठन्तु। छात्रा: पठन्ति।

1) दुर्जना: निन्दन्तु । ______।

2) सज्जना: स्तुवन्तु । ______।

3) लक्ष्मी: समाविशतु। ______।

Score

17. पेटिकातः क्त्वान्त- ल्यबन्त - तुमुन्नन्त पदानि चित्वा लिखत।

| | | | |
|---|---|---|---|
| आकर्ण्य | गृहीत्वा | मच्छिरः | वारयितुम् |

18. अधः प्रदत्तं गद्यभागं पठित्वा सूक्तीः उद्धृत्य लिखत।

पश्चात् गच्छन्तस्ते त्रयः कश्चन जनपदं प्रापुः। ते सर्वे ग्रामीणैः पृथक् स्वगृहं नीतवन्तः। प्रथमः भोजनार्थं सूत्रिकामलभत। सः ''दीर्घसूत्री विनश्यती''-ति सूक्तिं विचिन्त्य भोजनमत्यजत्। द्वितीयाय अपूपः दत्तः। ''अतिविस्तारविस्तीर्णं तद्भवेन्न चिरायुषमि'' त्युक्त्वा भक्षणं विहाय गतः। सोऽपि ''छिद्रेष्वनर्थाः बहुलोभवन्ति'' इत्युक्त्वा अनश्नन् गतः॥

**19-24 प्रश्नेषु चतुर्णाम् उत्तराणि लिखत। प्रत्येकं चत्वारः अङ्काः।** (4×4=16)

**19 മുതൽ 24 വരെയുള്ള ചോദ്യങ്ങളിൽ നാല് എണ്ണത്തിന് ഉത്തരമെഴുതുക. നാല് സ്കോർ വീതം.**

19. संभाषणांशान् पूरयत।

महिमा - सुप्रभातम्।

अखिला - ________। भवती कुत्र गच्छति ?

Score

महिमा - अहं ________ गच्छामि।

अखिला - बन्धुगृहे कः विशेषः ?

महिमा - बन्धुगृहे ________ प्रचलति।

अखिला - कस्य विवाहः ?

महिमा - भगिन्याः विवाहः। धन्यवादः

अखिला - ________।

20. गद्यक्रमं लिखत।

विशिखा ! निशिता विरम्यतां

क्षतमेयात् स्तिमितं न मे मनः।

पुरतो भ्रम लोकचक्र! मां

त्यज सीतामिह तां हतामहो।।

हे निशिता ____ विरम्यतां क्षतमेयात् ____ मे मनः क्षतं न एयात्। ____ इह पुरतः भ्रम हतां तां सीतां अहो ____ ।।

21. संख्यावाचकशब्दानुपयुज्य रिक्तस्थानानि पूरयत।

| | | | |
|---|---|---|---|
| 1 | एकम् | 2 | ___ |
| 3 | त्रीणि | 4 | चत्वारि |
| 5 | ___ | 6 | षट् |
| 7 | सप्त | 8 | ___ |
| 9 | ___ | 10 | दश |

22. श्लोकस्य द्वितीयभागं योजयित्वा लिखत ।

1) दोषेण तीव्रो विषयः

कृष्णसर्पविषादपि।

2) अकृत्वा शत्रुसंहारम्

अगत्वाखिलभूश्रियम्।

1) राजाहमिति शब्दान्नो

राजा भवितुमर्हति।।

2) कुरङ्गमातङ्गपतङ्गमीन-

भृङ्गाः नरः पञ्चभिरञ्जितः किम्

3) विषं निहन्ति भोक्तारं

द्रष्टारं चक्षुषाप्ययम्।।

Score

23. प्रदत्तनाटकसङ्केतयो: लक्षणं लिखत।

1) आत्मगतम्।

2) प्रकाशम्।

24. खण्डिकां पठित्वा अधोरेखाङ्कितपदानां स्थाने कोष्ठकात् समुचितमुत्तरं निर्धार्य खण्डिकां पुनर्लिखत।

एवं चिन्तानिरतेषु तेषु तन्मार्गेण कस्यचित् मृतस्य वणिक्पुत्रस्य दाहाय महाजनो गच्छन्नवर्तत। जनान् वीक्ष्य चतुर्णां मध्ये एकेन पुस्तकमवलोकितं कथितञ्च " महाजनो येन गत: स पन्था:।" तस्मात् तेन मार्गेण गच्छाम:। महाजनमनुसरन्तस्ते श्मशानं प्रापु:।

(उक्तञ्च, दृष्ट्वा, दहनाय, पितृवनं)

(3×5=15)

**25–28 प्रश्नेषु त्रयाणां उत्तराणि लिखत। प्रत्येकं पञ्च अङ्का:।**

**25 മുതൽ 28 വരെയുള്ള ചോദ്യങ്ങളിൽ മൂന്ന് എണ്ണത്തിന് ഉത്തരമെഴുതുക. അഞ്ച് സ്കോർ വീതം.**

25. यथोचितं योजयत।

घना: - वृक्षा:

तरव: - दुष्ट:

अम्बु: - मेघा:

खल: - अह:

दिनम् - जलम्

26. खण्डिकां पठित्वा प्रदत्तानां प्रश्नानाम् उत्तराणि लिखत ।

'' रत्नाकरो नाम निषादोऽहम् । पथिकानां धनानि अवश्यञ्चेत् प्राणान् चापहृत्य कुटुम्बं पोषयामि'' सः प्रत्यवदत्। ''एवं वा, पतिधर्म एव कुटुम्बपालनम्। किन्तु पथिकानां धनप्राणापहरणं किं न पापाय ? अस्य पापस्य तव कलत्रपुत्रादयः फल भाजः किम् ? मुनिरपृच्छत्। 'तदहं न जाने' इति निषादेन उक्ते ''एवं चेत् तान् पृष्ट्वा आगच्छतु, तावत्कालम् अत्रैव तिष्ठामः'' इति मुनिरवदत्।

1) निषादस्य नाम किम् ?

2) निषादः किम् अपहृत्य कुटुम्बं पोषयति ?

3) पतिधर्मः कः ?

4) 'भार्या' इत्यर्थे प्रयुक्तं पदं किम् ?

5) मुनिः किम् अवदत् ?

27. माहेश्वरसूत्राणि क्रमीकृत्य लिखत।

1) ऋलृक्।

2) अइउण्।

Score

3) ऐऔच्।

4) हयवरट्।

5) एओङ्।

28. अधोदत्तं गद्यभागं पठित्वा मातृभाषया आङ्गलभाषया वा अनुवदत।

" मम कर्मधीराः युवकाः यूयं सर्वे महान्ति कार्याणि कर्तुमागताः इति विश्वासः युष्मासु अवश्यं भवेत्। शुनकस्य भषणं श्रुत्वा मा भेष्ट। गगने विद्यमानेन विद्युतः प्रभावेनापि चकिताः न भवेत"।

(3×6=18)

**29–33 प्रश्नेषु त्रयाणां उत्तराणि लिखत। प्रत्येकं षट् अङ्काः।**

**29 മുതൽ 33 വരെയുള്ള ചോദ്യങ്ങളിൽ മൂന്ന് എണ്ണത്തിന് ഉത്തരമെഴുതുക. ആറ് സ്കോർ വീതം.**

29. 'क' विभागे प्रदत्तमाशययुक्तं श्लोकं 'ख' विभागात् चित्वा लिखत।

| क | ख |
|---|---|
| 1) साहित्यसङ्गीतादिषु विमुखः जनः जन्तुरेव भवति। | निन्दन्तु नीतिनिपुणाः यदिवास्तुवन्तु<br>लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।<br>अद्यैव वा मरणमस्तु युगान्तरे वा<br>न्याय्यात् पथः प्रविचलन्ति पदं न धीराः |

| | |
|---|---|
| 2) दुर्जनानां सज्जनानां मैत्री विभिन्ना। | साहित्यसङ्गीतकलाविहीनः<br>साक्षात्पशुः पुच्छविषाणहीनः।<br>तृणं न खादन्नपि जीवमान-<br>स्तद्भागधेयं परमं पशूनाम्।। |
| 3) धीराः न्यायमार्गात् पदं न प्रविचलन्ति। | आरम्भगुर्वी क्षयिणे क्रमेण<br>लघ्वी पुरा वृद्धिमती चपश्चात्।<br>दिनस्य पूर्वार्द्धपरार्द्धभिन्ना<br>छायेव मैत्रो खलसज्जनानाम्।। |

30. कथास्तम्भान् क्रमीकुरुत।

1) वत्सेति सम्बोधनया निषादस्य मनः आर्द्रमभवत्।

2) भार्यादीनां प्रतिवचनं निशम्य खिन्नोऽभवत्।

3) खड्गं प्रसार्य कश्चन निषादः आपतत्।

4) पश्चातापविवशः मुनीनां पुरतः अतिष्ठत्।

5) पापफलं कलत्रपुत्रादयः अनुभवन्तिवा ? इति मुनिरवदत्।

6) कर्णकठोरं गर्जनं श्रुत्वा सप्तर्षयः चकिताः अभवत्।

31. इष्टतमश्लोकं चित्वा सकारणं विशदयत ।

नहि देहिनि शोभनं भवे -
च्चरितार्थे सति जीवितं पुनः।
सुतरां नटने समापिते
स च रङ्गाद्विरमेत् कुशीलवः।।

इह सायमुषस्सु चान्वहं
वयमाना शबलांशुकानि या।
छदतेऽम्बरवेश्मतोरणं
प्रियसन्ध्ये! भवतीं नमामि ताम्।।

विशिखा! निशिता विरम्यतां
क्षतमेयात् स्तिमितं न मे मनः।
पुरतो भ्रम लोकचक्र ! मां
त्यज सीतामिह तां हतामहो।।

32. श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत।

उवाच चैनं परमार्थतो हरं

न वेत्सि नूनं यत एवमात्थ माम्।

अलोकसामान्यमचिन्त्यहेतुकं

द्विषन्ति मन्दाश्चरितं महात्मनाम्।

1) श्लोके 'शिवं' इत्यर्थे प्रयुक्तं पदं किम् ?

2) महात्मनां चरितं के द्विषन्ति ?

3) 'उवाच' इत्यस्य कोऽर्थः ?

(अलिखत्, अवदत्, अपश्यत्)

4) च + एनं = ________ ।

5) श्लोकस्य आशयं स्ववाक्यैः लिखत।

33. गद्यभागं संगृह्य लिखत।

एकदा स्वामी काशीनगरसमीपम् अटन्नासीत्। तदा केचन वानराः मार्गमवरुद्ध्य अतिष्ठन्। चकितः सः ततः अधावत्। अनुधावन्तः कपयः नखदशनादिभिः तमाक्रान्तुमुद्यताः। तद्दृष्ट्वा कश्चन पथिकः तमवदत् 'मा पलायस्व, तेषामभिमुखो भव' इति।

स्वामिनि तथानुष्ठिते वानराः भीताः प्रतिनिवृत्ताः। अनेन दृष्टान्तेन स्वामी मनसः प्रबलीकरणस्य अनिवार्यतां प्राबोधयत्।

नवत्रिंशद्वर्षपरिमितेन स्वकीयेन जीवितेन अतिविस्तृतानां भारतीयदर्शनानां प्रायोगिकतां लोकाय प्रकाशयन् अयं कर्मयोगी आचन्द्रतारं शोभतेतराम्।।

Score

(1×8=8)

34–35 प्रश्नयोः एकस्य उत्तरं लिखत, अष्ट अङ्काः।

34 മുതൽ 35 വരെ ഏതെങ്കിലും ഒരു ചോദ്യത്തിന് ഉത്തരമെഴുതുക. സ്കോർ എട്ട്

34. प्रदत्तसूचनामनुसृत्य पाणिन्याः जीवितकथां रचयत।

सूचना : 1) तक्षशिलायां पठनार्थं गतवान्।

2) सतीर्थ्याः मूढधीः पाणिनिः इति परिहसन्ति स्म।

3) किमपि नोक्त्वा गृहमगच्छत् ।

4) मात्रा साकं जलमाहर्तुं नदीमगच्छत्।

5) तपश्चरितुं निर्णिनाय।

6) महादेवं प्रत्यक्षीचकार।

7) माहेश्वरसूत्राणि स्वीकरोति।

8) अष्टाध्यायीं रचयति।

35. समयवाचकशब्दानुपयुज्य दिनचर्यां पूरयत ।

रतीशः_____(4.00) वादने उत्तिष्ठति। सः _____ (4.30) वादने शौचानन्तरं ध्यानं करोति। _____ (5.00) वादने स्वाध्यायं करोति। अनन्तरं _____ (6.30) वादने स्नानं कृत्वा प्रभातभक्षणं स्वीकरोति। _____ (8.00) वादने विद्यालयंप्रति गच्छति। _____ (9.15) वादने कक्ष्यां प्रविशति। _____ (4.30) वादन पर्यन्तं पाठान् पठति, क्रीडति च। _____ (5.30) वादने गृहं प्रत्यागच्छति ।।